I

हिमाचल प्रदेश केन्द्रीय विश्वविद्यालय
**Central University of Himachal Pradesh**
धौलाधार परिसर I -, धर्मशाला, जिला कांगड़ा -, हिमाचल प्रदेश –176215
Dhauladhar Campus - I, Dharamshala, District Kangra (HP)-176215
Website: http://www.cuhimachal.ac.in

आज़ादी का अमृत महोत्सव

# संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः चतुर्दशोपवेशनस्य (BoS-14) कार्यवृत्तम्

संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः चतुर्दशोपवेशनम् (BoS-14) 20.04.2023तमे दिनाङ्के गुरुवासरे हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयस्य धर्मशालास्थे धौलाधारपरिसर-1 इति स्थले अपराह्णे 02:00 वादने प्रतिभासीयमाध्यमेन प्रत्यक्षमाध्यमेन च समायोजितम्। उपवेशनस्य शुभारम्भः वैदिकमन्त्रमङ्गलाचरणेन पाठ्यसमितेः अध्यक्षस्य संयोजकस्य च डॉ.बृहस्पतिमिश्रस्य औपचारिकस्वागतभाषणेन अभूत्। अत्र संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः सर्वे सम्मानितसदस्याः उपस्थिताः आसन्। तेषां नामानि इत्थं सन्ति-

1. डॉ. बृहस्पतिमिश्रः, विभागाध्यक्षः, संस्कृतपालिप्राकृतविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (अध्यक्षः, पाठ्यसमितिः)
2. डॉ. वीरेन्द्रकुमारविद्यालंकारः, आचार्यः, विभागाध्यक्षः, संस्कृतविभागः, पंजाबविश्वविद्यालयः, चंडीगढ़ (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन उपस्थितः)
3. डॉ. ब्रजेशपाण्डेयः, आचार्यः, संस्कृतभारतीयाध्ययनसंकायः, जवाहरलालनेहरुविश्वविद्यालयः, कटवारिया सरायः, नवदेहली (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन उपस्थितः)
4. डॉ. एन. आर. गोपालः, सहाचार्यः, आंग्लविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (कुलपतिद्वारानामितः सदस्यः)
5. डॉ. एन. आर. गोपालः,अधिष्ठाता, भाषासंकायः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (पदेन सदस्यः)
6. डॉ. ओ.एस.के.एस.शास्त्री, आचार्यः, भौतिकीखगोलविज्ञानविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (कुलपतिद्वारा नामितः सदस्यः)
7. डॉ. योगेन्द्रकुमारः, आचार्यः, संस्कृतपालिप्राकृतविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (आचार्यपदेन विभागीयसदस्यः)
8. डॉ. कुलदीप कुमारः, सहायकाचार्यः, संस्कृतपालिप्राकृतविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (वरिष्ठः विभागीयसदस्यः)

## अत्र विभागाध्यक्षेण एषा कार्यसूची समुपस्थापिता

- **विषयक्र. : एस.के.टी./बी.ओ.एस.14.1 -** 22 मार्च 2023तमे दिनाङ्के आयोजितस्य पाठ्यसमितेः त्रयोदशोपवेशनस्य (BoS-13) कार्यवृत्तस्य अनुमोदनार्थम्।
- **विषयक्र. : एस.के.टी./बी.ओ.एस.14.2 -** संस्कृत पालि एवं प्राकृत विभाग इत्यस्य नामपरिवर्तनस्य परिचर्चापूर्वकम् अनुमोदनार्थम्।
- **विषयक्र. : एस.के.टी./बी.ओ.एस.14.3 -** शास्त्रिप्रथमसत्रस्य पाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादिसंशोधनस्य अनुमोदनार्थम्।
- **विषयक्र. : एस.के.टी./बी.ओ.एस.14.4 -** शास्त्रिद्वितीयसत्रस्य पाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादिसंशोधनस्य अनुमोदनार्थम्।
- **विषयक्र. : एस.के.टी./बी.ओ.एस.14.5 –** शास्त्रितृतीयसत्रस्य पाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादिसंशोधनस्य अनुमोदनार्थम्।
- **विषयक्र. : एस.के.टी./बी.ओ.एस.14.6–** शास्त्रिचतुर्थसत्रस्य SKT404, SKT419, SKT435, SKT434 पाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादिसंशोधनस्य अनुमोदनार्थम्।

- **विषयक्र. : एस.के.टी./बी.ओ.एस.14.7** - स्नातकोत्तरप्रथमसत्रस्य पाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादि संशोधनस्य अनुमोदनार्थम्।
- **विषयक्र. : एस.के.टी./बी.ओ.एस.14.8** - स्नातकोत्तरद्वितीयसत्रस्य पाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादि संशोधनस्य अनुमोदनार्थम्।
- **विषयक्र. : एस.के.टी./बी.ओ.एस.14.9** - स्नातकोत्तरतृतीयसत्रस्य पाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादि संशोधनस्य अनुमोदनार्थम्।

कोऽपि अतिरिक्तः विषयः अध्यक्षद्वारा अथवा अध्यक्षानुमत्या स्थापयितुं शक्यते यः सूचीपरिगणितः न स्यात्। अतः अध्यक्षेण सूच्यामपरिगणितत्वेऽपि एकः विषयः संस्थापितः। स च एवम् अस्ति -

- **विषयक्र.:एस.के.टी./बी.ओ.एस.14.10** - शोधोपाधिपाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादिसंशोधनस्य अनुमोदनार्थम्।

**अस्य उपवेशनस्य विषयक्रमानुसारेण कार्यवृत्तम् इत्थमस्ति-**

**विषयक्र.:एस.के.टी./बी.ओ.एस.14.1**

**22 मार्च 2023 तमे दिनाङ्के आयोजितस्य पाठ्यसमितेः त्रयोदशोपवेशनस्य (BoS-13) कार्यवृत्तस्य अनुमोदनार्थम्।**

**कार्य विवरणम्**

पाठ्यसमितेः विभागीयसदस्येन सहायकाचार्येण डॉ. कुलदीपकुमार महोदयेन 22 मार्च 2023तमे दिनाङ्के आयोजितस्य पाठ्यसमितेः त्रयोदशोपवेशनस्य (BoS-13) कार्यवृत्तस्य अनुमोदनार्थम् तस्य उपस्थापनं कृतम्। गभीरविचारानन्तरं समित्या सर्वसम्मत्या तस्य अनुमोदनं कृतम्। (संलग्नक सं. 1) पेज सं. (11-18)

**विषयक्र.:एस.के.टी./बी.ओ.एस.14.2**

**संस्कृत पालि एवं प्राकृत विभाग इत्यस्य नामपरिवर्तनस्य परिचर्चापूर्वकम् अनुमोदनार्थम्।**

**कार्य विवरणम्**

संस्कृत पालि एवं प्राकृत विभाग इत्यस्य नाम परिवर्त्य संस्कृतविभाग इति कर्तुं विभागाध्यक्षेण प्रस्तावः कृतः। तेनोक्तं यत् इदानीं विभागे संस्कृतभाषायाः एव अध्ययनम् अध्यापनं च प्रचलति। आगामिनि कालेऽपि विभागे पालिप्राकृतभाषयोः अध्ययनस्य व्यवस्थार्थं विश्वविद्यालयेन किमपि न विचार्यते। अतः नामश्रवणेन यः भ्रमः भवति तस्य परिहारार्थं नामपरिवर्तनमवश्यं करणीयमेव। विषयोऽयं परिचर्चापूर्वकम् अनुमोदनार्थं समितेः समक्षं प्रस्तूयत इति। गभीरविचारानन्तरं समित्या सर्वसम्मत्या अस्य अनुमोदनं कृतम्।

**विषयक्र. : एस.के.टी./बी.ओ.एस.14.3 -**

**शास्त्रिप्रथमसत्रस्य पाठ्यक्रमेषु नाम/मूल्याङ्कन विभागादि संशोधनस्य अनुमोदनार्थम्।**

**कार्यविवरणम्**

शास्त्रिप्रथमसत्रस्य पाठ्यक्रमेषु कृतस्य नाम/मूल्याङ्कनविभागादि संशोधनस्य मितिसदस्यैः गहनविचारानन्तरं सर्वसम्मत्या अनुमोदनं कृतम्। (संलग्नक. 2) पेज सं (19-42)

**विषयक्र. : एस.के.टी./बी.ओ.एस.14.4 –**

**शास्त्रिद्वितीयसत्रस्य पाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादि संशोधनस्य अनुमोदनार्थम्।**

**कार्यविवरणम्**

शास्त्रिद्वितीयसत्रस्य पाठ्यक्रमेषु कृतस्य नाम/मूल्याङ्कनविभागादि संशोधनस्य मितिसदस्यैः गहनविचारानन्तरं सर्वसम्मत्या अनुमोदनं कृतम्। (संलग्नक3) पृष्ठ (43-63)

**विषयक्र. : एस.के.टी./बी.ओ.एस.14.5 –** **शास्त्रितृतीयसत्रस्य पाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादि संशोधनस्य अनुमोदनार्थम्।**

**कार्यविवरणम्** शास्त्रितृतीयसत्रस्यपाठ्यक्रमेषु कृतस्य नाम/मूल्याङ्कनविभागादि संशोधनस्य समितिसदस्यैः गहनविचारानन्तरं सर्व सम्मत्या अनुमोदनं कृतम्। (संलग्नक 4) पृष्ठ (64-90)

**विषयक्र.:एस.के.टी./बी.ओ.एस.14.6 –** **शास्त्रिचतुर्थसत्रस्य SKT404, SKT419, SKT435, SKT434 पाठ्यक्रमेष नाम/मूल्याङ्कनविभागादिसंशोधनस्य अनुमोदनार्थम्।**

**कार्यविवरणम्** शास्त्रिचतुर्थसत्रस्य SKT404, SKT419, SKT435, SKT434 पाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादिसंशोधनस्य समितिसदस्यैः गहनविचारानन्तरं सर्वसम्मत्या अनुमोदनं कृतम्। (संलग्नक सं. 5) (पृष्ठ सं. 91-100)

**विषयक्र.:एस.के.टी./बी.ओ.एस.14.7–** **स्नातकोत्तरप्रथमसत्रस्य पाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादि संशोधनस्य अनुमोदनार्थम्**

**कार्यविवरणम्** स्नातकोत्तरप्रथमसत्रस्य पाठ्यक्रमेषु कृतस्य नाम/मूल्याङ्कनविभागादि संशोधनस्य समितिसदस्यैः गहनविचारानन्तरं सर्वसम्मत्या अनुमोदनं कृतम्। (संलग्नक सं. 6) (पृष्ठ सं. 101-126)

**विषयक्र.: एस.के.टी./बी.ओ.एस.14.8 -** **स्नातकोत्तरद्वितीय सत्रस्य पाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादि संशोधनस्य अनुमोदनार्थम्।**

**कार्यविवरणम्** स्नातकोत्तरद्वितीयसत्रस्य पाठ्यक्रमेषु कृतस्य नाम/मूल्याङ्कनविभागादि संशोधनस्य समितिसदस्यैः गहनविचारानन्तरं सर्वसम्मत्या अनुमोदनं कृतम्। (संलग्नक सं 7) (पृष्ठ सं. 127-141)

**विषयक्र.: एस.के.टी./बी.ओ.एस.14.9 -** **स्नातकोत्तरतृतीयसत्रस्य पाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादि संशोधनस्य अनुमोदनार्थम्।**

**कार्यविवरणम्** स्नातकोत्तरतृतीयसत्रस्य पाठ्यक्रमेषु कृतस्य नाम/मूल्याङ्कनविभागादि संशोधनस्य समितिसदस्यैः गहनविचारानन्तरं सर्वसम्मत्या अनुमोदनं कृतम्। (संलग्नक-8) (पृष्ठ सं. 142-160)

**विषयक्र. : एस.के.टी./बी.ओ.एस.14.10 -** **शोधोपाधिपाठ्यक्रमेषु नाम/मूल्याङ्कनविभागादिसंशोधनस्य अनुमोदनार्थम्।**

**कार्यविवरणम्** शोधोपाधिपाठ्यक्रमेषु कृतस्य नाम/मूल्याङ्कनविभागादिसंशोधनस्य समितिसदस्यैः गहनविचारानन्तरं सर्वसम्मत्या अनुमोदनं कृतम्। (संलग्नक 9) (पृष्ठ सं. 161-182)

**अन्ते अध्यक्षद्वारा बाह्यविषयविशेषज्ञानां कुलपतिद्वारा नामितसदस्यानां विभागीयसदस्यानां च आभारः प्रकटितः। अनेन आभारप्रदर्शनेन साकमेव कल्याणश्लोकपुरस्सरं संस्कृत-पालि-प्राकृतविभागस्य पाठ्यसमितेः चतुर्दशम् उपवेशनं (BoS-14) संपन्नमभूत्।**

1. डॉ. बृहस्पतिमिश्रः, विभागाध्यक्षः, संस्कृतपालिप्राकृतविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (अध्यक्षः, पाठ्यसमितिः)

4

2. डॉ. वीरेन्द्रकुमारविद्यालंकारः, आचार्यः, विभागाध्यक्षः, संस्कृतविभागः, पंजाबविश्वविद्यालयः, चंडीगढ़ (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन उपस्थितः)
3. डॉ. ब्रजेशपाण्डेयः, आचार्यः, संस्कृतभारतीयाध्ययनसंकायः, जवाहरलालनेहरुविश्वविद्यालयः, कटवारिया सरायः, नवदेहली (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन उपस्थितः)
4. डॉ. एन. आर. गोपालः, सहाचार्यः, आंग्लविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (कुलपतिद्वारानामितः सदस्यः)
5. डॉ. एन. आर. गोपालः,अधिष्ठाता, भाषासंकायः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (पदेन सदस्यः)
6. डॉ. ओ.एस.के.एस.शास्त्री, आचार्यः, भौतिकीखगोलविज्ञानविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (कुलपतिद्वारा नामितः सदस्यः)
7. डॉ. योगेन्द्रकुमारः, आचार्यः, संस्कृतपालिप्राकृतविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (आचार्यपदेन विभागीयसदस्यः)
8. डॉ. कुलदीप कुमारः, सहायकाचार्यः, संस्कृतपालिप्राकृतविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (वरिष्ठः विभागीयसदस्यः)

विभागाध्यक्षः,
संस्कृतपालिप्राकृतविभागः

कार्यालयीयः हिन्दी-अनुवादः

## संस्कृत पालि एवं प्राकृत विभाग की पाठ्य समिति के चतुर्दश उपवेशन (BoS-14) का कार्यवृत्त

संस्कृत,पालि एवं प्राकृत विभाग की पाठ्यसमिति का चतुर्दश उपवेशन (BoS-14) हिमाचलप्रदेश केन्दीय विश्वविद्यालय के धर्मशालास्थित धौलाधारपरिसर-1 में 20.04.2023 को अपराह्न 02: बजे प्रतिभासीय (online) और प्रत्यक्ष (offline) माध्यम से हुई। गोष्ठी का आरम्भ वैदिक मङ्गलाचरण एवं पाठ्य समिति के अध्यक्ष एवं संयोजक डॉ.बृहस्पतिमिश्र के औपचारिक स्वागत-भाषण से हुआ।

**पाठ्यसमिति के सम्मानित सदस्यों के नाम इस प्रकार हैं :**

1. डॉ. बृहस्पतिमिश्रः, विभागाध्यक्षः, संस्कृतपालिप्राकृतविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (अध्यक्षः, पाठ्यसमितिः)
2. डॉ. वीरेन्द्रकुमारविद्यालंकारः, आचार्यः, विभागाध्यक्षः, संस्कृतविभागः, पंजाबविश्वविद्यालयः, चंडीगढ़ (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन उपस्थितः)
3. डॉ. ब्रजेशपाण्डेयः, आचार्यः, संस्कृतभारतीयाध्ययनसंकायः, जवाहरलालनेहरुविश्वविद्यालयः, कटवारिया सरायः, नवदेहली (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन उपस्थितः)
4. डॉ.एन.आर. गोपालः, सहाचार्यः, आंग्लविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (कुलपतिद्वारानामितः सदस्यः)
5. डॉ.एन.आर. गोपालः, अधिष्ठाता, भाषासंकायः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (पदेन सदस्यः)
6. डॉ. ओ.एस.के.एस.शास्त्री, आचार्यः, भौतिकीखगोलविज्ञानविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (कुलपतिद्वारा नामितः सदस्यः)
7. डॉ. योगेन्द्रकुमारः, आचार्यः, संस्कृतपालिप्राकृतविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (आचार्यपदेन विभागीयसदस्यः)
8. डॉ. कुलदीप कुमारः, सहायकाचार्यः, संस्कृतपालिप्राकृतविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः (वरिष्ठः विभागीयसदस्यः)

### इस बैठक में विभागाध्यक्ष ने अग्रलिखित कार्यसूची का उपस्थापन किया

- **विषयक्र. : एस.के.टी./बी.ओ.एस.14.1** - 22 मार्च, 2023 को त्रयोदशी पाठ्य समिति (BoS-13) की बैठक के कार्यवृत्त के अनुमोदनार्थ।
- **विषयक्र. : एस.के.टी./बी.ओ.एस.14.2** - संस्कृत पालि एवं प्राकृत विभाग के नाम परिवर्तन हेतु चर्चा एवं अनुमोदनार्थ।

- **विषयक्र. : एस.के.टी./बी.ओ.एस. 14.3** - शास्त्री प्रथम सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ।
- **विषयक्र. एस.के.टी./बी.ओ.एस.14.4** - शास्त्री द्वितीय सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ।
- **विषयक्र.: एस.के.टी./बी.ओ.एस.14.5** - शास्त्री तृतीय सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ।
- **विषयक्र.: एस.के.टी./बी.ओ.एस.14.6** – शास्त्री चतुर्थ सत्र के SKT404, SKT419, SKT435, SKT434 पाठ्यक्रमों के नाम/मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ।
- **विषयक्र.: एस.के.टी./बी.ओ.एस.14.7** - स्नातकोत्तर प्रथम सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ।
- **विषयक्र.: एस.के.टी./बी.ओ.एस.14.8**- स्नातकोत्तर द्वितीय सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ।
- **विषयक्र.: एस.के.टी./बी.ओ.एस.14.9** - स्नातकोत्तर तृतीय सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ।

**कोई भी अतिरिक्त विषय अध्यक्ष द्वारा अथवा अध्यक्ष की अनुमति से स्थापित किया जा सकता है। अतः अध्यक्ष के द्वारा सूची में न होते हुए भी एक विषय स्थापित किया गया जो इस प्रकार हैं-**

- **विषयक्र.: एस.के.टी./बी.ओ.एस.14.10** - शोधोपाधि के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ।

**उक्त स्थापित विषयों का क्रमानुसार कार्यवृत्त इस प्रकार है -**

**विषयक्र.: एस.के.टी./बी.ओ.एस.14.1-** **22 मार्च, 2023 को त्रयोदशी पाठ्य समिति (BoS-13) की बैठक के कार्यवृत्त का अनुमोदन।**

**कार्य विवरण** संस्कृत पालि एवं प्राकृत विभाग की त्रयोदशी पाठ्य समिति (BOS-13) के कार्यवृत्त डॉ. कुलदीप कुमार, सहायक आचार्य, संस्कृत पालि एवं प्राकृत विभाग द्वारा समिति के समक्ष प्रस्तुत किये गये। समिति के सदस्यों द्वारा विचार विमर्श करने के उपरान्त इसका अनुमोदन किया गया। (संलग्नक -1 )

**विषयक : एस.के.टी./बी.ओ.एस.14.2** - **संस्कृत पालि एवं प्राकृत विभाग के नाम परिवर्तन हेतु परिचर्चा एवं अनुमोदनार्थ।**

**कार्य विवरण** संस्कृत पालि एवं प्राकृत विभाग की पाठ्य समिति के सदस्यों ने संस्कृत पालि एवं प्राकृत विभाग का नाम बदल कर संस्कृत विभाग रखने के लिए पाठ्य समिति के सभी सदस्यों ने सहमति दी और इसका अनुमोदन किया।

**विषयक:एस.के.टी./बी.ओ.एस.14.3–** **शास्त्री प्रथम सत्र के पाठ्यक्रम के नाम/मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ।**

**कार्य विवरण** शास्त्री प्रथम सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के प्रस्तावित संशोधन का पाठ्यसमिति के सदस्यों ने गहन विचार करने के उपरान्त अनुमोदन कर दिया। (संलग्नक-2 )

**विषयक : एस.के.टी./बी.ओ.एस.14.4** - **शास्त्री द्वितीय सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के**

**संशोधन के अनुमोदनार्थ।**

कार्य विवरण

शास्त्री द्वितीय सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन का पाठ्य समिति के सदस्यों ने गहन विचार करने के उपरान्त अनुमोदन कर दिया। (संलग्नक -3)

**विषयक : एस.के.टी./बी.ओ.एस.14.5 -** **शास्त्री तृतीय सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ।**

कार्य विवरण

शास्त्री तृतीय सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन का पाठ्य समिति के सदस्यों ने गहन विचार करने के उपरान्त अनुमोदन कर दिया। (संलग्नक-4)

**विषयक्र.: एस.के.टी./बी.ओ.एस.14.6 –** **शास्त्री चतुर्थ सत्र के SKT404, SKT419, SKT435, SKT434 पाठ्यक्रमों के नाम/ मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ**

कार्य विवरण

शास्त्री चतुर्थ सत्र के SKT404, SKT419, SKT435, SKT434 पाठ्यक्रमों के नाम/ मूल्याङ्कनविभागादि के संशोधन का पाठ्य समिति के सदस्यों ने गहन विचार करने के उपरान्त अनुमोदन कर दिया। (संलग्नक -5)

**विषयक:एस.के.टी./बी.ओ.एस.14.7-** **स्नातकोत्तर प्रथम सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ।**

कार्य विवरण

स्नातकोत्तर प्रथम सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन का पाठ्य समिति के सदस्यों ने गहन विचार करने के उपरान्त अनुमोदन कर दिया। (संलग्नक -6)

**विषयक:एस.के.टी./बी.ओ.एस.14.8-** **स्नातकोत्तर द्वितीय सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ**

कार्य विवरण

स्नातकोत्तर द्वितीयसत्र के पाठ्यक्रम के नाम/मूल्याङ्कनविभागादि के संशोधन का पाठ्यसमिति के सदस्यों ने विचार करने के उपरान्त अनुमोदन कर दिया।(संलग्नक-7)

**विषयक:एस.के.टी./बी.ओ.एस.14.9 -** **स्नातकोत्तर तृतीय सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ**

कार्य विवरण

स्नातकोत्तर तृतीय सत्र के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन का पाठ्य समिति के सदस्यों ने गहन विचार करने के उपरान्त अनुमोदन कर दिया। (संलग्नक -8)

**विषयक्र.: एस.के.टी./बी.ओ.एस.14.10** **शोधोपाधि के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन के अनुमोदनार्थ**

कार्य विवरण

शोधोपाधि के पाठ्यक्रम के नाम/ मूल्याङ्कनविभागादि के संशोधन का पाठ्य समिति के सदस्यों ने गहन विचार करने के उपरान्त अनुमोदन कर दिया। (संलग्नक -9)

Gmail

Rajesh Patial <rajesh89patyal@gmail.com>

**BOS-14**

**Rajesh Patial** <rajesh89patyal@gmail.com> Thu, Jun 29, 2023 at 4:17 PM
To: Virendra Alankar <alankarvk@gmail.com>, "Dr. Brajesh Kumar Pandey" <brajeshvka@gmail.com>
Cc: Brihaspati Mishra <mishrabrihaspati@hpcu.ac.in>

## संस्कृत पालि एवं प्राकृत विभाग की चतुर्दशी पाठ्य समिति (BOS-14) के कार्यवृत्त के संदर्भ में।

आदरणीय महोदय,
विभागाध्यक्ष, संस्कृत पालि एवं प्राकृत विभाग के निर्देशानुसार आपसे निवेदन किया जाता है कि संस्कृत पालि एवं प्राकृत विभाग की **चतुर्दशी पाठ्य समिति (BOS-14)** के कार्यवृत्त और उसके संलग्नक अनुमोदन हेतु संलग्न हैं कृपया प्राप्त करें तथा अनुमोदन कर कृतार्थ करें।

[Quoted text hidden]

**10 attachments**

**कार्यवृत्त BoS- 14.pdf**
2461K

**BoS-14 (1).PDF**
212K

**BoS-14 (5).PDF**
153K

**BoS-14 (3).PDF**
1056K

**BoS-14 (2).PDF**
494K

**BoS-14 (4).PDF**
1198K

**BoS-14 (7).PDF**
546K

**BoS-14 (6).PDF**
719K

**BoS-14 (8).PDF**
332K

**BoS-14 (9).PDF**
1074K

BoS-14 (4).PDF
1198K

BoS-14 (7).PDF
546K

BoS-14 (6).PDF
719K

BoS-14 (8).PDF
332K

BoS-14 (9).PDF
1074K

---

**Dr. Brajesh Kumar Pandey** <brajeshvka@gmail.com> Thu, Jun 29, 2023 at 5:52 PM
To: Rajesh Patial <rajesh89patyal@gmail.com>
Cc: Virendra Alankar <alankarvk@gmail.com>, Brihaspati Mishra <mishrabrihaspati@hpcu.ac.in>

अनुमोदित
[Quoted text hidden]

---

**Rajesh Patial** <rajesh89patyal@gmail.com> Thu, Jun 29, 2023 at 5:49 PM
To: brajeshvka@gmail.com

--
[Quoted text hidden]

---

**Virendra Alankar** <alankarvk@gmail.com> Thu, Jun 29, 2023 at 8:04 PM
To: Rajesh Patial <rajesh89patyal@gmail.com>

मैं विगत समिति BoS -14 में पारित कार्यवृत्त का अनुमोदन करता हूं।
वी. अलंकार

[Quoted text hidden]

---

**Rajesh Patial** <rajesh89patyal@gmail.com> Thu, Jun 29, 2023 at 8:04 PM
To: alankarvk@gmail.com

[Quoted text hidden]

Gmail

Rajesh Patial <rajesh89patyal@gmail.com>

# संस्कृत पालि एवं प्राकृत विभाग की चतुर्दशी पाठ्य समिति (BOS-14) के कार्यवृत्त के संदर्भ में।

**Sastri OSKS** <sastri.osks@hpcu.ac.in> Thu, Jun 29, 2023 at 1:41 PM
To: Rajesh Patial <rajesh89patyal@gmail.com>
Cc: Virendra Alankar <alankarvk@gmail.com>, brajeshkumar@jnu.ac.in, "Dr. Brajesh Kumar Pandey" <brajeshvka@gmail.com>, Nanduri Raj Gopal <neelargopal@gmail.com>, Kuldeep Kumar <kuldeep.scss@hpcu.ac.in>, dhamayk@hpcu.ac.in, Brihaspati Mishra <mishrabrihaspati@hpcu.ac.in>

Approved

Sent from my iPhone

> On 29-Jun-2023, at 11:59 AM, Rajesh Patial <rajesh89patyal@gmail.com> wrote:
>
> आदरणीय महोदय,
> विभागाध्यक्ष, संस्कृत पालि एवं प्राकृत विभाग के निर्देशानुसार आपको सूचित किया जाता है कि संस्कृत पालि एवं प्राकृत विभाग की **चतुर्दशी पाठ्य समिति (BOS-14)** के कार्यवृत्त आपके अनुमोदन हेतु संलग्न हैं। कृपया प्राप्त करें तथा अनुमोदन कर कृतार्थ करें।
> <कार्यवृत्त.BOS-14.docx>

हिमाचल प्रदेश केंद्रीय विश्वविद्यालय
Central University of Himachal Pradesh
(केंद्रीय विश्वविद्यालय अधिनियम2009 के तहत स्थापित)
धर्मशाला,जिला कांगड़ा-176215, हिमाचल प्रदेश

## संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः त्रयोदशोपवेशनस्य (BoS-13) कार्यवृत्तम्

संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः त्रयोदशोपवेशनम् (BoS-13) हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयस्य धर्मशालास्थिते धौलाधारपरिसर-1 इति स्थले 22 मार्च, 2023 तमे दिनाङ्के अपराह्णे 02 वादने प्रतिभासीयप्रत्यक्षमाध्यमाभ्यां सम्पन्नमभूत् । उपवेशनस्य शुभारम्भः वैदिकमन्त्रमङ्गलाचरणेन पाठ्यसमितेः अध्यक्षस्य संयोजकस्य च डॉ.बृहस्पतिमिश्रस्य औपचारिकस्वागतभाषणेन अभूत् ।

अत्र पाठ्यसमितेः सर्वे सम्मानितसदस्याः उपस्थिता आसन् । तेषां नामानि इत्थं सन्ति :

1. डॉ. बृहस्पतिमिश्रः, विभागाध्यक्षः, संस्कृतपालिप्राकृतविभागः (अध्यक्षः, पाठ्यसमितिः)
2. डॉ. नण्डूरी राजगोपालः, अधिष्ठाता, भाषासंकायः ( पदेन सदस्यः)
3. डॉ. वीरेन्द्रकुमारविद्यालंकारः, आचार्यः, विभागाध्यक्षः, संस्कृतविभागः, पंजाबविश्वविद्यालयः, चंडीगढ़ (बाह्यविशेषज्ञः ) (प्रतिभासीयमाध्यमेन)
4. डॉ. ब्रजेशपाण्डेयः, आचार्यः, संस्कृत एवं भारतीयाध्ययनसंकायः,जवाहरलालनेहरूविश्वविद्यालयः, कटवारियासरायः, नवदेहली (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन)
5. डॉ. नण्डूरी राजगोपालः, सहाचार्यः, आंग्लविभागः, (कुलपतिद्वारा नामितःसदस्यः)
6. डॉ. ओ.एस.के.एस.शास्त्री, आचार्यः, भौतिकीखगोलविज्ञानविभागः (कुलपतिद्वारा नामितः सदस्यः)
7. डॉ. कुलदीप कुमारः, सहायकाचार्यः, संस्कृतपालिप्राकृतविभागः (विभागीयः वरिष्ठसदस्यः)

**संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः अस्मिन् त्रयोदशोपवेशने (BoS-13) विभागाध्यक्षः अग्रलिखितां कार्यसूचीम् उपस्थापितवान्**

1. **विषयक्र0 - एस.के.टी./बी.ओ.एस.13.1-** 12सितम्बर , 2022तमे दिनाङ्के सम्पन्नस्य पाठ्यसमितेः द्वादशोपवेशनस्य (BoS-12) कार्यवृत्तस्य अनुमोदनहेतवे ।
2. **विषयक्र0 - एस.के.टी./बी.ओ.एस.13.2** -शास्त्रिचतुर्थसत्रस्य पाठ्यक्रमस्य अनुमोदनहेतवे ।
3. **विषयक्र0. :एस.के.टी./बी.ओ.एस. 13.3** – स्नातकोत्तरचतुर्थसत्रस्य पाठ्यक्रमस्य अनुमोदनहेतवे ।
4. **विषयक्र0 - एस.के.टी./बी.ओ.एस.13.4** - शोधार्थिनः दीपकनौटियालस्य अनुमोदितशोधविषयस्य नामोल्लेखस्य अनुमोदनहेतवे ।
5. **विषयक्र0 - एस.के.टी./बी.ओ.एस.13.5** - शास्त्रिणे निर्धारितायाः सेतुपरीक्षायाः मूल्याङ्कनप्रकारस्य अनुमोदनहेतवे ।
6. **विषयक्र0 - एस.के.टी./बी.ओ.एस.13.6** – संस्कृतपालिप्राकृतविभागे वसन्तसत्रे, 2023तमे ख्रीष्टाब्दे शास्त्री, बी.ए. (संस्कृत) , स्नातकोत्तर,विद्यावाचस्पति इत्येतेषु अध्ययनकार्यक्रमेषु पाठ्यमानानां पाठ्यक्रमाणां सूच्याः अनुमोदनार्थम् ।
7. **विषयक्र0 - एस.के.टी./बी.ओ.एस.13.7-** राष्ट्रियशिक्षानीतिः -2020 इत्यस्या अनुपालने शास्त्री, बी.ए. (संस्कृत), स्नातकोत्तर इत्येतेषु अध्ययनकार्यक्रमेषु आयोज्यमानानां परीक्षाणां मूल्याङ्कनप्रकारस्य अनुमोदनहेतवे ।

<u>विषयक्रमानुसारेण कार्यविवरणमित्थमस्ति-</u>

**<u>एस.के.टी./बी.ओ.एस.13.1-</u>** **12 सितम्बर , 2022तमे पाठ्यसमितेः द्वादशोपवेशनस्य (BoS-12) कार्यवृत्तस्य अनुमोदनहेतवे ।**

**<u>कार्यविवरणम्</u>** संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः द्वादशोपवेशनस्य (BoS-12) कार्यवृत्तं संस्कृतपालिप्राकृतविभागस्य सहायक आचार्यः डॉ. कुलदीपकुमारः समितेः समक्षं प्रस्तुतवान् । समितिसदस्यैः गभीरविचारविमर्शानन्तरमस्य अनुमोदनं कृतम् । (संलग्नक -1)

**<u>एस.के.टी./बी.ओ.एस.13.2 -</u>** **शास्त्रिचतुर्थसत्रस्य पाठ्यक्रमस्य अनुमोदनहेतवे ।**

**<u>कार्यविवरणम्</u>** संस्कृतपालिप्राकृतविभागस्य शास्त्रिचतुर्थसत्रस्य पाठ्यक्रमः पाठ्यसमितिसदस्यैः विचारविमर्शानन्तरम् अनुमोदितः । (संलग्नक-2)

**<u>एस.के.टी./बी.ओ.एस. 13.3 –</u>** **स्नातकोत्तरचतुर्थसत्रस्य पाठ्यक्रमस्य अनुमोदनहेतवे ।**

**<u>कार्यविवरणम्</u>** संस्कृतपालिप्राकृतविभागस्य स्नातकोत्तरचतुर्थसत्रस्य पाठ्यक्रमः पाठ्यसमितिसदस्यैः विचारविमर्शानन्तरम् अनुमोदितः । (संलग्नक -3)

**<u>एस.के.टी./बी.ओ.एस.13.4 -</u>** **शोधार्थिनः दीपकनौटियालस्य अनुमोदितशोध-विषयस्य नामोल्लेखस्य अनुमोदनहेतवे ।**

**<u>कार्यविवरणम्</u>** शोधार्थिनः दीपकनौटियालस्य शोधविषयस्य अनुमोदनम् पाठ्यसमितेः पञ्चमोपवेशने (BoS-05) (15अक्टूबर, 2019) सर्वसम्मत्या जातमासीत् । किन्तु तत्र तस्य शीर्षकस्य शब्दशः उल्लेखो नास्ति । शोधार्थिनः दीपकनौटियालस्य शोधविषयः इत्थमस्ति **'सिन्धुकन्यागद्यकाव्यस्य भाषावैज्ञानिकाध्ययनम्'** । समितिसदस्यैः सर्वसम्मत्या अस्य नामोल्लेखनस्य अनुमोदनं कृतम् ।

**एस.के.टी./बी.ओ.एस.13.5 -** **शास्त्रिणे निर्धारितायाः सेतुपरीक्षायाः मूल्याङ्कनप्रकारस्य अनुमोदनहेतवे।**

**कार्यविवरणम्**

बी.ए.- संस्कृत (प्रतिष्ठा ) इति उपाधिं प्राप्तवताम् अध्ययनरतानां वा विद्यार्थिनां उपाधिपत्रे शास्त्रीति शब्दं योजयितुं विश्वविद्यालयद्वारा घटितायाः अधिकारप्राप्तसमितेः अनुशंसायाः फलस्वरूपं सेतुपरीक्षायाः व्यवस्था कृतासीत्। अस्याः मूल्याङ्कनप्रकारस्य स्पष्टप्रतिपत्त्यर्थं तस्य अनुमोदनम् आवश्यकमस्ति । सेतुपरीक्षायां साहित्यशास्त्रस्य चत्वारि प्रश्नपत्राणि निर्धारितानि आसन्। यत्र प्रतिप्रश्नपत्रं 04 श्रेयाङ्काः भविष्यन्ति। तेषां मूल्याङ्कनप्रकारः एवं विभक्तो भविष्यति-

मध्यसत्रपरीक्षा - 50 (25%)
सततम् आन्तरिकमूल्याङ्कनम् - 50 (25%)
सत्रान्तपरीक्षा - 100 (50%)
कुलयोगः =200 (100%)

एष मूल्याङ्कनप्रकारः पाठ्यसमितिसदस्यैः सर्वसम्मत्या अनुमोदितः।

**एस.के.टी./बी.ओ.एस.13.6 -** **संस्कृतपालिप्राकृतविभागे वसन्तसत्रे, 2023तमे ख्रीष्टाब्दे शास्त्री, बी.ए. , स्नातकोत्तर,विद्यावाचस्पति इत्येतेषु अध्ययनकार्यक्रमेषु पाठ्यमानानां पाठ्यक्रमाणां सूच्याः अनुमोदनार्थम्।**

**कार्यविवरणम्**

संस्कृतपालिप्राकृतविभागे वसन्तसत्रे, 2023तमे ख्रीष्टाब्दे शास्त्री, बी.ए. , स्नातकोत्तर,विद्यावाचस्पति इत्येतेषु अध्ययनकार्यक्रमेषु पाठ्यमानानां पाठ्यक्रमाणां सूचीम् अवलोक्य गहनं च विचार्य पाठ्यसमितिसदस्यैः सर्वसम्मत्या एषा सूची अनुमोदिता। (संलग्नक -4)

**एस.के.टी./बी.ओ.एस.13.7-** **राष्ट्रियशिक्षानीतिः -2020 इत्यस्या अनुपालने शास्त्री, बी.ए. (संस्कृत), स्नातकोत्तर(संस्कृत) इत्येतेषु अध्ययनकार्यक्रमेषु आयोज्यमानानां पूर्वयोजितानां वा परीक्षाणां मूल्याङ्कनप्रकारस्य अनुमोदनहेतवे।**

**कार्यविवरणम्**

राष्ट्रियशिक्षानीतिः -2020 इत्यस्या अनुपालने शास्त्री, बी.ए., स्नातकोत्तर इत्येतेषु अध्ययनकार्यक्रमेषु आयोज्यमानानां परीक्षाणां मूल्याङ्कनप्रकारः इत्थं भविता-

मध्यसत्रपरीक्षा - 20%
सततम् आन्तरिकमूल्याङ्कनम् - 20%
सत्रान्तपरीक्षा - 60%

2 श्रेयाङ्कवतां प्रश्नपत्राणां पूर्णाङ्काः शतं (100) 4 श्रेयाङ्कवतां प्रश्नपत्राणां च पूर्णाङ्काः द्विशतं (200) एव भविष्यन्ति किन्तु मूल्याङ्कनस्य विभागः उक्तरीत्या परिवर्तितः भविष्यति तथा च राष्ट्रियशिक्षानीतिः -2020 इत्यस्या अनुपालने शास्त्री, बी.ए.(संस्कृत), स्नातकोत्तर (संस्कृत) इत्येतेषु अध्ययनकार्यक्रमेषु पूर्वयोजितानां परीक्षाणां मूल्याङ्कनप्रकारः अपि पूर्वोक्तप्रकारेणैव अनुमन्यः अस्ति । एष परिवर्तितः विभागः समितिसदस्यैः सर्वसम्मत्या अनुमोदितः। ध्यातव्यमस्ति यत् पूर्वमेष विभागः मध्यसत्रपरीक्षायां 25% सततम् आन्तरिकमूल्याङ्कने 25% सत्रान्तपरीक्षायां च 50% आसीत् यः इदानीम् उक्तरीत्या परिवर्त्य अनुमोदितः।

अन्ते अध्यक्षेण भाषासंकायस्य अधिष्ठातृवर्यस्य, बाह्यविषयविशेषज्ञयोः, कुलपतिद्वारा नामितसदस्ययोः विभागीयसदस्यस्य च कृते कृतज्ञता प्रकटिता । अनेन कृतज्ञताप्रदर्शनेन तथा च सामूहिकमन्त्रोच्चारणेन साकमेव संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः त्रयोदशम् उपवेशनं (BoS-13) संपन्नमभूत्।

1. डॉ. बृहस्पतिमिश्रः, विभागाध्यक्षः, संस्कृतपालिप्राकृतविभागः (अध्यक्षः, पाठ्यसमितिः)
2. डॉ. नण्डूरी राजगोपालः, अधिष्ठाता, भाषासंकायः ( पदेन सदस्यः)
3. डॉ. वीरेन्द्रकुमारविद्यालंकारः, आचार्यः, विभागाध्यक्षः, संस्कृतविभागः, पंजाबविश्वविद्यालयः, चंडीगढ़ (बाह्यविशेषज्ञः ) (प्रतिभासीयमाध्यमेन)
4. डॉ. ब्रजेशपाण्डेयः, आचार्यः, संस्कृत एवं भारतीयाध्ययनसंकायः, जवाहरलालनेहरूविश्वविद्यालयः, कटवारियासरायः, नवदेहली (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन)
5. डॉ. नण्डूरी राजगोपालः, सहाचार्यः, आंग्लविभागः, (कुलपतिद्वारा नामितःसदस्यः)
6. डॉ. ओ.एस.के.एस.शास्त्री, आचार्यः, भौतिकीखगोलविज्ञानविभागः (कुलपतिद्वारा नामितः सदस्यः)
7. डॉ. कुलदीप कुमारः, सहायकाचार्यः, संस्कृतपालिप्राकृतविभागः (विभागीयः वरिष्ठसदस्यः)

विभागाध्यक्षः,
संस्कृतपालिप्राकृतविभागः

## कार्यालयीयः अनुवादः

## संस्कृत पालि एवं प्राकृत विभाग की
## पाठ्य समिति की (BoS-13) त्रयोदशी संगोष्ठी की बैठक का कार्यवृत्त

संस्कृत,पालि एवं प्राकृत विभाग की पाठ्यसमिति (BoS-13) त्रयोदशी की बैठक हिमाचल प्रदेश केंद्रीय विश्वविद्यालय के धर्मशालास्थित धौलाधारपरिसर-1 धौलाधारपरिसर-1 में 22 मार्च , 2023 को अपराह्न 02 : बजे प्रतिभासीय (online) और प्रत्यक्ष (offline) माध्यम से हुई। गोष्ठी का आरंभ वैदिक मंगलाचरण एवं पाठ्य समिति के अध्यक्ष एवं संयोजक डॉ.बृहस्पतिमिश्र के औपचारिक स्वागतभाषण से हुआ।

पाठ्यसमिति के सम्मानित सदस्यों के नाम इस प्रकार हैं :

1. डॉ. बृहस्पतिमिश्रः, विभागाध्यक्षः, संस्कृतपालिप्राकृतविभागः (अध्यक्षः, पाठ्यसमितिः)
2. डॉ. नण्डूरी राजगोपालः, अधिष्ठाता, भाषासंकायः ( पदेन सदस्यः)
3. डॉ. वीरेन्द्रकुमारविद्यालंकारः, आचार्यः, विभागाध्यक्षः, संस्कृतविभागः, पंजाबविश्वविद्यालयः, चंडीगढ़ (बाह्यविशेषज्ञः ) (प्रतिभासीयमाध्यमेन)
4. डॉ. ब्रजेशपाण्डेयः, आचार्यः, संस्कृत एवं भारतीयाध्ययनसंकायः,जवाहरलालनेहरूविश्वविद्यालयः, कटवारियासरायः, नवदेहली (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन)
5. डॉ. नण्डूरी राजगोपालः, सहाचार्यः, आंग्लविभागः, (कुलपतिद्वारा नामितःसदस्यः)
6. डॉ. ओ.एस.के.एस.शास्त्री, आचार्यः, भौतिकीखगोलविज्ञानविभागः (कुलपतिद्वारा नामितः सदस्यः)
7. डॉ. कुलदीप कुमारः, सहायकाचार्यः, संस्कृतपालिप्राकृतविभागः (विभागीयः वरिष्ठसदस्यः)

**इस बैठक में विभागाध्यक्ष ने अग्रलिखित कार्यसूची उपस्थापित की**

- विषयक्र0 : एस.के.टी./बी.ओ.एस.13.1- 12 सितम्बर , 2022 को द्वादशी पाठ्य समिति (BoS-12) की बैठक के कार्यवृत का अनुमोदन हेतु।
- विषयक्र0 : एस.के.टी./बी.ओ.एस.13.2 - शास्त्री चतुर्थ सत्र के पाठ्यक्रम के अनुमोदन हेतु।
- विषयक्र0 : एस.के.टी./बी.ओ.एस. 13.3 – स्नातकोत्तर चतुर्थ सत्र के पाठ्यक्रम के अनुमोदन हेतु।

- विषयक्र0 : एस.के.टी./बी.ओ.एस.13.4 - शोधार्थी दीपक नौटियाल के अनुमोदित शोध विषय के नामोल्लेख के अनुमोदन हेतु ।
- विषयक्र0 : एस.के.टी./बी.ओ.एस.13.5 - शास्त्री सेतु की परीक्षा के प्रकार के अनुमोदन हेतु ।
- विषयक्र0 : एस.के.टी./बी.ओ.एस.13.6 - संस्कृत पालि एवं प्राकृत विभाग में वसंत सत्र, 2023 में पढाये जा रहे शास्त्री, बी.ए. , स्नातकोत्तर संस्कृत और पीएच.डी. कार्यक्रमों की विषय सूची के अनुमोदनार्थ।
- विषयक्र0 : एस.के.टी./बी.ओ.एस.13.7- राष्ट्रीय शिक्षा नीति -2020 की अनुपालना में शास्त्री बी.ए. तथा स्नातकोत्तर कक्षाओं में आयोजित की जाने वाली परीक्षाओं के मूल्यांकन प्रकार के अनुमोदन हेतु।

**कार्यवृत्त निम्नलिखित प्रकार से है:**

**एस.के.टी./बी.ओ.एस.13.1-** **12 सितम्बर , 2022 को पाठ्य समिति (BoS-12) की द्वादशी बैठक के कार्यवृत्त का अनुमोदन ।**

**कार्य विवरण** संस्कृत पालि एवं प्राकृत विभाग की एकादशी पाठ्य समिति (BOS-12) के बारहवीं बैठक कार्यवृत्त डॉ. कुलदीप कुमार, सहायक आचार्य, संस्कृत पालि एवं प्राकृत विभाग द्वारा समिति के समक्ष प्रस्तुत किये गये। जिसका समिति के सदस्यों द्वारा विचार विमर्श करने के उपरांत अनुमोदन किया गया। (संलग्नक -1)

**एस.के.टी./बी.ओ.एस.13.2 -** **शास्त्री चतुर्थ सत्र के पाठ्यक्रम के अनुमोदन हेतु ।**

**कार्य विवरण** संस्कृत पालि एवं प्राकृत विभाग में शास्त्री चतुर्थ सत्र के पाठ्यक्रम का पाठ्य समिति के सदस्यों द्वारा विचार विमर्श करने के उपरांत अनुमोदन किया। (संलग्नक -1)

**एस.के.टी./बी.ओ.एस. 13.3 –** **स्नातकोत्तर चतुर्थ सत्र के पाठ्यक्रम के अनुमोदन हेतु ।**

**कार्य विवरण** संस्कृत पालि एवं प्राकृत विभाग में स्नातकोत्तर चतुर्थ सत्र के पाठ्यक्रम का पाठ्य समिति के सदस्यों द्वारा विचार विमर्श करने के उपरांत अनुमोदन किया गया। (संलग्नक -1)

**एस.के.टी./बी.ओ.एस.13.4 -** **शोधार्थी दीपक नौटियाल के अनुमोदित शोध विषय के नामोल्लेख के अनुमोदन ।**

**कार्य विवरण** शोधार्थी दीपक नौटियाल के शोध विषय का अनुमोदन 5वी पाठ्य समिति (15 अक्टूबर, 2019) में कर दिया गया था।

किन्तु उसके शीर्षक का शब्दशः उल्लेख नहीं है। शोधार्थी दीपक नौटियाल का शोध विषय इस प्रकार से है **'सिन्धुकन्यागद्यकाव्यस्य भाषावैज्ञानिकाध्ययनम्'** जिसका पाठ्य समिति के सदस्यों ने शोध विषय का अनुमोदन किया।

**एस.के.टी./बी.ओ.एस.13.5 -**

**कार्य विवरण**

**शास्त्री सेतु की परीक्षा के प्रकार के अनुमोदन हेतु ।**

सेतु परीक्षा की व्यवस्था बी.ए. (संस्कृत - प्रतिष्ठा ) उपाधि प्राप्त एवं अध्ययनरत विद्यार्थियों को शास्त्री उपाधि प्रदान करने के लिए विश्वविद्यालय द्वारा गठित अधिकार प्राप्त समिति की अनुशंसा के फलस्वरूप की गयी थी| इसके मूल्यांकन प्रकार के स्पष्ट बोध के लिए उसका अनुमोदन आवश्यक हैं । सेतु परीक्षा में साहित्यशास्त्र के चार प्रश्नपत्र निर्धारित किये गये थे। जिसमे हर प्रश्न पत्र 04 श्रेयांक के होंगे एवं उनका मूल्यांकन प्रकार इस प्रकार विभक्त होगा।

मध्यसत्र परीक्षा - 50 (25%)

सतत आंतरिक मूल्यांकन - 50 (25%)

सत्रांत परीक्षा - 100 (50%)

कुल योग = 200 (100%)

जिसका पाठ्य समिति के सदस्यों ने अनुमोदन किया।

**एस.के.टी./बी.ओ.एस.13.6 -**

**संस्कृत पालि एवं प्राकृत विभाग में बसंत सत्र, 2023 में पढाये जा रहे शास्त्री, बी.ए. (संस्कृत), स्नातकोत्तर (संस्कृत) और पीएच.डी. कार्यक्रमों की विषय सूची के अनुमोदनार्थ।**

**कार्य विवरण**

संस्कृत पालि एवं प्राकृत विभाग में बसंत सत्र, 2023 में पढाये जा रहे शास्त्री, बी.ए. , स्नातकोत्तर संस्कृत और पीएच.डी. कार्यक्रमों की विषय सूची का पाठ्य समिति के सदस्यों ने गहन विचार करने के उपरांत अनुमोदन किया|

**एस.के.टी./बी.ओ.एस.13.7-**

**राष्ट्रीय शिक्षा नीति -2020 की अनुपालना में शास्त्री बी.ए. तथा स्नातकोत्तर कक्षाओं में आयोजित की जाने वाली परीक्षाओं के मूल्यांकन प्रकार के अनुमोदन हेतु।**

**कार्य विवरण**

राष्ट्रीय शिक्षा नीति -2020 की अनुपालना में शास्त्री, बी.ए. (संस्कृत) तथा स्नातकोत्तर (संस्कृत) कक्षाओं में आयोजित की जाने वाली परीक्षाओं का मूल्यांकन इस प्रकार होगा :

मध्यसत्र परीक्षा - 20%
सतत आंतरिक मूल्यांकन - 20%
सत्रांत परीक्षा - 60%

2 श्रेयांक वाले प्रश्न पत्रों का पूर्णांक 100 एवं 4 श्रेयांक वाले प्रश्नपत्रों का पूर्णांक 200 ही रहेगा किन्तु मूल्यांकन का विभाग उक्त रीति से परिवर्तित हो जायेगा। ध्यातव्य है कि पहले यह विभाजन मध्य सत्र परीक्षा में 25% सतत आंतरिक मूल्यांकन में 25% एवं सत्रांत परीक्षा में 50% था। किन्तु विश्वविद्यालय के नियमानुसार उक्त क्रम से परिवर्तन कर दिया गया। यह उक्त मूल्यांकन व्यवस्था राष्ट्रीय शिक्षा नीति -2020 की अनुपालना में शास्त्री, बी.ए. (संस्कृत) तथा स्नातकोत्तर (संस्कृत) की कक्षाओं में पूर्व में आयोजित की गई परीक्षाओं में भी अनुमन्य है। जिसका समिति सदस्यों द्वारा अनुमोदन किया गया।

अंत में अध्यक्ष के द्वारा अधिष्ठाता महोदय, बाह्यविषयविशेषज्ञों, कुलपति द्वारा नामित सदस्यों एवं विभागीयसदस्य का आभार प्रकट किया गया। इस आभार प्रदर्शन तथा सामूहिक वैदिक मन्त्रोच्चारण के साथ ही संस्कृत पाली एवं प्राकृतविभाग की पाठ्यसमिति का त्रयोदश उपवेशन संपन्न हुआ।

1. डॉ. बृहस्पतिमिश्रः, विभागाध्यक्षः, संस्कृतपालिप्राकृतविभागः (अध्यक्षः, पाठ्यसमितिः)
2. डॉ. नण्डूरी राजगोपालः, अधिष्ठाता, भाषासंकायः ( पदेन सदस्यः)
3. डॉ. वीरेन्द्रकुमारविद्यालंकारः, आचार्यः, विभागाध्यक्षः, संस्कृतविभागः, पंजाबविश्वविद्यालयः, चंडीगढ़ (बाह्यविशेषज्ञः ) (प्रतिभासीयमाध्यमेन)
4. डॉ. ब्रजेशपाण्डेयः, आचार्यः, संस्कृत एवं भारतीयाध्ययनसंकायः,जवाहरलालनेहरूविश्वविद्यालयः, कटवारियासरायः, नवदेहली (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन)
5. डॉ. नण्डूरी राजगोपालः, सहाचार्यः, आंग्लविभागः, (कुलपतिद्वारा नामितःसदस्यः)
6. डॉ. ओ.एस.के.एस.शास्त्री, आचार्यः, भौतिकीखगोलविज्ञानविभागः (कुलपतिद्वारा नामितः सदस्यः)
7. डॉ. कुलदीप कुमारः, सहायकाचार्यः, संस्कृतपालिप्राकृतविभागः (विभागीयः वरिष्ठसदस्यः)

25-5-2023
विभागाध्यक्षः,
संस्कृत पालि एवं प्राकृत विभागः

# हिमाचल प्रदेश केंद्रीय विश्वविद्यालय

## Central University of Himachal Pradesh

हिमाचल ,धर्मशाला,176215, website: www.cuhimachal.ac.in


आज़ादी का अमृत महोत्सव

### संस्कृत पालि एवं प्राकृत विभागः

### सारणी

| क्रमांक | | पाठ्यक्रम कूट संख्या Course Code | पाठ्यक्रम नाम Course Name | श्रेयांक Credit | | पेपर तैयार करने से सम्बन्धित बाहरी परीक्षकों) फील्ड ,सेमिनार,प्रयोगशाला,द्वारा (वर्क |
|---|---|---|---|---|---|---|
| | | | शास्त्री प्रथम सत्रम् SHASTRI (BA SANSKRIT) – 1st SEMESTER | | | |
| 1. | MAJOR-1 | SKT401 | संस्कृतव्याकरणम् – 1 ( संज्ञासन्धिशब्दरूपाणि / Linguistics - Morphology) | 4 | | बाहरी परीक्षकों द्वारा |
| 2. | MAJOR-2 | SKT416 | संस्कृतसाहित्यम् -1 ( छन्दः नीतिकथा च / Prosody and Fable ) | 4 | | बाहरी परीक्षकों द्वारा |
| 3. | MINOR-1 | SKT 431 | दर्शनम् – 1 ( तर्कसिद्धान्ताः / Introduction to Nyaya and Vaisheshika philosophy | 4 | | बाहरी परीक्षकों द्वारा |
| 4. | VOCATIONAL/SKILL | SKT 209 | व्यावहारिकं संस्कृतम् (Communicative Sanskrit) | 2 | | बाहरी परीक्षकों द्वारा |
| 5. | LAB/FIELD WORK | SKT 476 | शुद्धोच्चारणम् (Correct Pronunciation) | 2 | | SEMINAR/ प्रयोगशाला |
| 6. | IKS | SKT 471 | भारतीयज्ञानप्रणाली (Indian Knowledge System) | 4 | | आन्तरिकपरीक्षा |
| 7. | MINOR-2/ INTERDISCIPLINARY | EEL-110 | Functional and Communicative Skills in English | 4 | | बाहरी परीक्षकों द्वारा |
| 8. | ADDITIONAL | SKT-499 | अनुवादः (Translation) {यह विषय प्रथम सत्र में (+2 में बिना संस्कृत विषय वाले छात्रों के लिए केवल) मात्र पास करना अनिवार्य है । इस पत्र के श्रेयांकों का योग कुल श्रेयाङ्कों मे नही होगा} | 4 | | आन्तरिकपरीक्षा |

संस्कृत-पालि-प्राकृत-विभागः
हिमाचल प्रदेश केन्द्रीय विश्वविद्यालयः, धर्मशाला
Website: http://www.cuhimachal.ac.in

आज़ादी का अमृत महोत्सव

# शास्त्रीति उपाधेः उद्देश्यम्

**शास्त्रीति उपाधेः उद्देश्यम्**

- भारतस्य आत्मानम् अवगन्तुं संस्कृतशास्त्राणाम् अध्ययनम् अत्यावश्यकं वर्तते ।
- भारतीयानां सर्वासां सद्विद्यानां मूलं वेदाः तदनुकूलशास्त्राणि च वर्तन्ते । अतस्तेषाम् अध्ययनम् अनिवार्यम् ।
- संस्कृतशास्त्राणाम् अध्ययनं भारतं प्रति गौरवभावं वर्धयति । हीनभावनां नाशयति ।
- शास्त्रसम्पत्तेः संरक्षणे सति ज्ञानगङ्गा अजस्रं प्रवाहिता भविष्यति ।
- शास्त्र्युपाधौ निर्धारितविषयेषु व्याकरणशास्त्रं भाषां रक्षति, शास्त्रान्तराणामवगमने सामर्थ्यं जनयति । नूतनशब्दनिर्माणेन भारतीयभाषाः पोषयति ।
- साहित्यं सहजतया व्यावहारिकं ज्ञानं वर्धयति समाजं सन्मार्गं नयति ।
- दर्शनशास्त्रं तत्त्वज्ञानं कारयति सदसतोः भेदञ्च प्रकटयति ।
- ज्यौतिषं कालज्ञानं कारयति, अर्थं प्रददाति ।
- भारतीयज्ञानपद्धत्या चिन्तनधारायां परिवर्तनं भविष्यति ।
- उपाधिरयं प्रतिष्ठां वृत्तिञ्च प्रददाति ।

# संस्कृतव्याकरणम्-1 (संज्ञासन्धिशब्दरूपाणि / Linguistics - Morphology)

**पाठ्यक्रमस्य कूटक्रमाङ्कः –SKT 401** **श्रेयाङ्काः – 4**

**पाठ्यक्रमस्य नाम - संस्कृतव्याकरणम्-1 (संज्ञासन्धिशब्दरूपाणि / Linguistics - Morphology)**

**पाठ्यक्रमस्यउद्देश्यानि** - पाठ्यक्रमस्य उद्देश्यं वर्तते व्याकरणस्य अध्ययनद्वारा संस्कृतभाषायाः शुद्धप्रयोगस्य सामर्थ्यसम्पादनपुरस्सरं संस्कृतवाङ्मयस्य गभीराध्ययने सौकर्यसम्पादनम्, तथा च संस्कृतव्याकरणसिद्धान्तानां रचनात्मकावबोधसम्पादनम्।

**पाठ्यक्रमस्य प्रतिफलम्** -पाठ्यक्रमस्य प्रतिफलं वर्तते व्याकरणस्य अध्ययनद्वारा संस्कृतभाषायाः शुद्धप्रयोगं कर्तुं समर्थाः भविष्यन्ति, संस्कृतवाङ्मयस्य गभीराध्ययने सौकर्यसम्पादनं भविष्यति, तथा च संस्कृतव्याकरणसिद्धान्तानां रचनात्मकावबोधसम्पादनं भविष्यति।

**श्रेयाङ्काः** - 04 [एकम् क्रेडिट व्याख्यानम् – संघटितकक्ष्यागतिविधेः वैयक्तिकसम्पर्कस्य च 10 होरासमानम्, प्रयोगशालायाः/व्यावहारिककार्यस्य/अनुशिक्षणस्य/शिक्षकनियन्त्रितगतिविधीनां 5 होरासमानम्, अन्यकार्याणि यथा स्वतन्त्रव्यक्तिगतकार्याणि, सामूहिककार्याणि, निर्धारितानि अनिवार्य/वैकल्पिककार्याणि, साहित्यसमीक्षा, पुस्तकालयकार्याणि, तथ्यसंग्रहाः, शोधपत्रलेखनम्, संगोष्ठीपत्रलेखनादिम् 15 होरासमानं भवति ]

**उपस्थितेः अनिवार्यता** - पाठ्यविषयस्य पूर्णतया अवबोधाय तस्य च लाभानां सुनिश्चयाय छात्राणाम् कक्ष्यासु उपवेशनम् अत्यन्तमनिवार्यमस्ति। कक्ष्यासु न्यूनतम 75% उपस्थितिः न भवति चेत् छात्राणां परीक्षासु उपवेशनस्य अवसरः निरस्तीकर्तुं शक्यते।

| **मूल्याङ्कनस्य विभागः** | | **पूर्णाङ्काः – 200** |
|---|---|---|
| **माध्यमिकी परीक्षा** | - | **20%** |
| **सत्रान्तपरीक्षा** | - | **60%** |
| **सततम् आन्तरिकमूल्याङ्कनम्** | - | **20%** |

## SKT401 - संस्कृतव्याकरणम्-1 (संज्ञासन्धिशब्दरूपाणि / Linguistics - Morphology)

### सैद्धान्तिकम् 50% प्रायोगिकम् 50%

❖ <u>विषयान्तर्वस्तु</u>

| अन्वितिसंख्या | विषयः | अङ्काः |
|---|---|---|
| 1. | संज्ञाप्रकरणम् | 20 % |
| 2 | सन्धिः<br>☞ अच्सन्धिप्रकरणम्<br>☞ प्रकृतिभावसन्धिप्रकरणम्<br>☞ हल्सन्धिप्रकरणम्<br>☞ विसर्गसन्धिप्रकरणम्<br>☞ स्वादिसन्धिप्रकरणम्<br>☞ सैद्धान्तिकं प्रायोगिकञ्च | 35 % |

| | | |
|---|---|---|
| 3 | अजन्तपुंल्लिङ्गप्रकरणम् | 25 % |
| 4 | अजन्तस्त्रीलिङ्गप्रकरणम् | 10 % |
| 5 | अजन्तनपुंसकलिङ्गप्रकरणम् | 10 % |

## निर्धारितग्रन्थः -

1. मध्यसिद्धान्तकौमुदी, सुबोधिनीव्याख्या,चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।

## सन्दर्भग्रन्थाः –

2. मध्यसिद्धान्तकौमुदी,बालमनोरमा संस्कृतटीका भाषाटीकासहितम्, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।
3. लघुसिद्धान्तकौमुदी, भैमी व्याख्या (भाग १-३) शास्त्री भीमसेन, भैमी प्रकाशन, दिल्ली।
4. सिद्धान्तकौमुदी, गोविन्दाचार्यः, मूलमात्रम्, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी॥
5. सिद्धान्तकौमुदी, शास्त्री धरानन्दः, मूल एवं हिन्दी व्याख्या, मोती लाल बनारसी दास, नई दिल्ली।
6. लघुसिद्धान्तकौमुदी, गोविन्दाचार्यः, चौखम्बासंस्कृतसंस्थान वाराणसी।
7. लघुसिद्धान्तकौमुदी, शास्त्री धरानन्दः, मूल एवं हिन्दी व्याख्या, मोती लाल बनारसी दास, नई दिल्ली।

व्याख्यानानां योजना -

| व्याख्यानानां सङ्ख्या | व्याख्यानानां विषयाः | निर्धारितानि पुस्तकानि |
|---|---|---|
| 1,2,3,4,5,6,7,8,9 | संज्ञाप्रकरणम् | 1 |
| 10,11,12,13,14 | अच्सन्धिप्रकरणम् | 1 |
| 15,16 | प्रकृतिभावसन्धिप्रकरणम् | 1 |
| 17,18,19,20 | हल्सन्धिप्रकरणम् | 1 |
| 21,22 | विसर्गसन्धिप्रकरणम् | 1 |
| 23,24 | स्वादिसन्धिप्रकरणम् | 1 |
| 25,26,27,28,29,30,31,32 | अजन्तपुंल्लिङ्गप्रकरणम् | 1 |
| 33,34,35,36 | अजन्तस्त्रीलिङ्गप्रकरणम् | 1 |
| 37,38,39,40 | अजन्तनपुंस्कलिङ्गप्रकरणम् | 1 |



अकुमारी

# संस्कृतसाहित्यम्-1 (छन्दः नीतिकथा च / Prosody and Fable)

**पाठ्यक्रमस्य कूटक्रमाङ्कः –SKT 416** **श्रेयाङ्काः – 4**

**संस्कृतसाहित्यम्-1 (छन्दः नीतिकथा च / Prosody and Fable)**

**पाठ्यक्रमस्य उद्देश्यानि** – साहित्यशास्त्रे वृत्तरत्नाकरस्य परिचयेन छन्दःपरिचयः भविष्यति। छात्राः छन्दःशास्त्रस्य यति-गति-लयादि विषयैः परिचिताः भविष्यन्ति। छात्राः छन्दोज्ञानेन पद्यकाव्यस्य पठने आनन्दानुभूतिं प्राप्नुवन्ति। हितोपदेशेन बालेषु नैतिकतायाः आधानं भविता। नीतिग्रन्थानां परिचयोपि भविष्यति।

**प्रतिफलम्** - साहित्यशास्त्रे वृत्तरत्नाकरस्य परिचयेन छन्दःपरिचयः भवति। छात्राः छन्दःशास्त्रस्य यति-गति-लयादि विषयैः परिचिताः भवन्ति। छात्राः छन्दोज्ञानेन पद्यकाव्यस्य पठने आनन्दानुभूतिं प्राप्नुवन्ति। हितोपदेशेन बालेषु नैतिकतायाः आधानं भविष्यति। नीतिग्रन्थानां परिचयोपि भवति। प्रतियोगिपरीक्षासु लाभः भवति। कथाप्रवचनकर्तृणां छन्दोज्ञानेन श्लोकादिगायने साहाय्यं भविष्यति।

**क्रेडिट :**04 [एकम् क्रेडिट व्याख्यानम् – संघटितकक्ष्यागतिविधेः वैयक्तिकसम्पर्कस्य च 10 होरासमानम्, प्रयोगशालायाः/व्यावहारिककार्यस्य/अनुशिक्षणस्य/शिक्षकनियन्त्रितगतिविधीनां 5 होरासमानम्, अन्यकार्याणि यथा स्वतन्त्रव्यक्तिगतकार्याणि, सामूहिककार्याणि, निर्धारितानि अनिवार्य/वैकल्पिककार्याणि, साहित्यसमीक्षा, पुस्तकालयकार्याणि, तथ्यसंग्रहाः, शोधपत्रलेखनम्, संगोष्ठीपत्रलेखनादिम् 15 होरासमानं भवति]

**उपस्थितेः अनिवार्यता** - पाठ्यविषयस्य पूर्णतया अवबोधाय तस्य च लाभानां सुनिश्चयाय छात्राणाम् कक्ष्यासु उपवेशनम् अत्यन्तमनिवार्यमस्ति। कक्ष्यासु न्यूनतम 75% उपस्थितिः न भवति चेत् छात्राणां परीक्षासु उपवेशनस्य अवसरः निरस्तीकर्तुं शक्यते।

**मूल्याङ्कनस्य मापदण्डः –**

**मूल्याङ्कनस्य विभागः (पूर्णाङ्काः - 200)**

| | | | |
|---|---|---|---|
| (क) | माध्यमिकी परीक्षा | – | 20% |
| (ख) | सत्रान्तपरीक्षा | – | 60% |
| (ग) | सततम् आन्तरिकमूल्याङ्कनम् | – | 20% |

# संस्कृतसाहित्यम्-1 (छन्दः नीतिकथा च / Prosody and Fable)

सैद्धान्तिकम् 50% प्रायोगिकम् 50%

**अन्वितिसंख्या** **विषयः**

१. **वृत्तरत्नाकरः** **(60% अङ्कानां कृते)**

(क.) मङ्गलाचरणं ग्रन्थकर्तुः परिचयः,
छन्दःशास्त्रस्य दशाक्षराणि गणलक्षणानि च।
पादलक्षणानि, यतिलक्षणानि च
वृत्तभेदकथनम्, मात्राच्छन्दः - आर्याछन्दसः लक्षणम्।

(ख.) अनुष्टुप्प्रकरणम् -अनुष्टुप्-छन्दः
वर्णसमवृत्तानि- विद्युन्माला, माणवकम्
इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः

(ग.) वंशस्थम्, तोटकम्, द्रुतविलम्बितम्, भुजङ्गप्रयातम्
स्रग्विणी, मालती, प्रहर्षिणि, वसन्ततिलका
मालिनी, पञ्चचामरम्, शिखरिणी, हरिणी
मन्दाक्रान्ता, शार्दूलविक्रीडितम्

**मित्रलाभः (हितोपदेशः) प्रास्ताविकं विहाय (40%अङ्कानां कृते)**

(घ). मित्रलाभः (हितोपदेशः) 1-4 कथाः (श्लोकसहिताः)

(ङ.). मित्रलाभः (हितोपदेशः) 5-8 कथाः (श्लोकसहिताः)

**निर्धारितग्रन्थाः-**

1. वृत्तरत्नाकरः. केदारभट्टविरचितम्. मोतीलालबनारसीदास, नई दिल्ली.
2. हितोपदेशः - नारायणपण्डित- विरचितम् , मोतीलालबनारसीदास, नई दिल्ली

**सहायकग्रन्थाः**

क. छन्दोमञ्जरी, श्री गङ्गादासप्रणीता, चौखम्बा सुरभारती प्रकाशन, वाराणसी

ख. सस्कृत साहित्य का इतिहास. बलदेव उपाध्याय. शारदा निकेतन, वाराणसी

ग. **व्याख्यानयोजना –**

| व्याख्यानसंख्या | व्याख्यानविषयः | निर्धारितपुस्तकानि |
|---|---|---|
| | **वृत्तरत्नाकरः** | |
| 1-2 | मङ्गलाचरणं ग्रन्थकर्तुः परिचयश्च | 1 |
| 3-4 | छन्दःशास्त्रस्य दशाक्षराणि गणलक्षणानि च | 1 |
| 5-7 | पादलक्षणानि, यतिलक्षणानि च | 1 |
| 8-9 | वृत्तभेदकथनम्, मात्राच्छन्दः-आर्याछन्दसः लक्षणम् | 1 |
| 10-11 | अनुष्टुप्प्रकरणम् -अनुष्टुप् छन्दः | 1 |
| 12-13 | वर्णसमवृत्तानि -विद्युन्माला, माणवकम् | 1 |
| 14-15 | इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः | 1 |
| 16-17 | वंशस्थं, तोटकम्, द्रुतविलम्बितम्, भुजङ्गप्रयातम्, | 1 |
| 18-19 | मालती, वसन्ततिलका, | 1 |
| 20-21 | मालिनी, पञ्चचामरम्, शिखरिणी, | 1 |
| 22,23,24 | मन्दाक्रान्ता, शार्दूलविक्रिडितम् | 1 |
| | **हितोपदेशः (मित्रलाभः) प्रास्ताविकं विहाय** | |
| 25-32 | 1-4 कथाः (श्लोकसहिताः) | 2 |
| 36-40 | 5-8 कथाः (श्लोकसहिताः) | 2 |

## दर्शनम् -1 (तर्कसिद्धान्ता: / Introduction to Nayaya and Vaisheshika Philosophy)

**पाठ्यक्रम कूटक्रमाङ्कः –SKT- 431** **श्रेयाङ्का: – 4**

**पाठ्यक्रमस्य नाम – दर्शनम् -1 (तर्कसिद्धान्ता: / Introduction to Nayaya and Vaisheshika Philosophy)**

**श्रेयाङ्का**: 04 [एकश्रेयव्याख्यानम् – संघटितकक्ष्यागतिविधेः वैयक्तिकसम्पर्कस्य च १० होरासमानम्, प्रयोगशालायाः/व्यावहारिककार्यस्य/अनुशिक्षणस्य/शिक्षकनियन्त्रितगतिविधीनां ५ होरासमानम्, अन्यकार्याणि यथा स्वतन्त्रव्यक्तिगतकार्याणि, सामूहिककार्याणि, निर्धारितानि अनिवार्य/वैकल्पिककार्याणि, साहित्यसमीक्षा, पुस्तकालयकार्याणि, तथ्यसंग्रहाः, शोधपत्रलेखनम्, संगोष्ठीपत्रलेखनादिम् १५ होरासमानं भवति ]

**पाठ्यक्रमस्य उद्देश्यानि** – पाठ्यक्रमस्य उद्देश्यं छात्रेभ्यः वैदिककालीनसंस्कृतेः तत्कालीनजीवनपद्धत्याः वर्तमानकाले उपादेयतायाः बोधेन सहैव संस्कृतवाङ्मयस्य अत्यन्तं विस्तृतसाहित्यस्य परिचयप्रदानपूर्वकं अस्माकं शास्त्रीयपरम्पराणां विषये गभीराध्ययनाय विश्लेषणाय च अवसरप्रदानमस्ति।

**उपस्थितेः अनिवार्यता** - पाठ्यविषयस्य पूर्णतया अवबोधाय तस्य च लाभानां सुनिश्चयाय छात्राणां कक्ष्यासु उपवेशनम् अत्यन्तमनिवार्यमस्ति। कक्ष्यासु न्यूनतम ७५% उपस्थितिः न भवति चेत् छात्राणां परीक्ष्यासु उपवेशस्य अवसरः निरस्तीकर्तुं शक्यते।

**मूल्याङ्कनस्य विभागः –** **(पूर्णाङ्का: - 200)**

माध्यमिकी परीक्षा – 20%

सत्रान्तपरीक्षा – 60%

सततम् आन्तरिकमूल्याङ्कनम् –20%

**दर्शनम् -1 (तर्कसिद्धान्ता: / Introduction to Nayaya and Vaisheshika Philosophy)**

सैद्धान्तिकम् 50% प्रायोगिकम् 50%

❖ <u>**विषयवस्तु-**</u>

**क - विभाग**

**तर्कसंग्रहः**

**इकाई- 1**

1. सप्त पदार्थाः
2. नव द्रव्याणि

अजहरिदास:

3. चतुर्विंशतिः गुणाः
4. अभावश्चतुर्विधः
5. पृथिवीलक्षणम्

**इकाई- 2**

6. अब्लक्षणम्
7. तेजोलक्षणम्
8. वायुलक्षणम्
9. आकाशलक्षणम्
10. आत्मनः लक्षणम्

**इकाई- 3**

11. मनसः लक्षणम्
12. रूपलक्षणम्
13. रसलक्षणम्
14. गन्धलक्षणम्
15. स्पर्शलक्षणम्
16. संख्यालक्षणम्

**इकाई- 4**

17. त्रिविधकारणम्
18. शब्दलक्षणम्
19. बुद्धिलक्षणम्
20. प्रत्यक्षलक्षणम्
21. षड्विधसन्निकर्षः

भयहरियास:

## विभाग- ख

### इकाई- 5

1. अनुमानलक्षणम्
2. द्विविधानुमानम्
3. हेत्वाभासः
4. उपमानम्
5. शब्दः
6. वाक्यार्थः हेतुः
7. त्रिविधसंस्कारः
8. समवायः
9. अभावः

### व्याख्यानयोजना

| व्याख्यानसंख्या | व्याख्यानविषयः | निर्धारितपुस्तकानि |
|---|---|---|
| १-२ | सप्त पदार्थाः | १, २, ३ |
| ३-४ | नव द्रव्याणि | १, २, ३ |
| ५-७ | चतुर्विंशतिः गुणाः | १, २, ३ |
| ८-१० | अभावश्चतुर्विधः ,पृथिवीलक्षणम् | १, २, ३ |
| ११-१२ | अब्लक्षणम् ,तेजोलक्षणम् | १, २ |
| १३-१४ | वायुलक्षणम् , आकाशलक्षणम् | १, २ |
| १५ | आत्मनः लक्षणम् | १, २ |
| १६-१७ | मनसः लक्षणम् , रूपलक्षणम् | १, २ |
| १८ | रसलक्षणम् , गन्धलक्षणम् | १, ३,६ |
| १९ -२० | स्पर्शलक्षणम् ,संख्यालक्षणम् | १, ४, ६ |
| २१-२२ | त्रिविधकारणम् | १, ४, ६ |
| २३-२४ | शब्दलक्षणम् , बुद्धिलक्षणम् | १, ७, ८ |
| २५-२६ | प्रत्यक्षलक्षणम् | १, ७, ८ |
| २७- ३० | षड्विधसन्निकर्षः | १, ७, ८ |

व्रजटरिदास

| | | |
|---|---|---|
| ३१-३२ | अनुमानलक्षणम् | १, ७, ८ |
| ३३-३४ | द्विविधानुमानम् | १, ७, ८ |
| ३५-३७ | हेत्वाभासः | १, ७, ८, ९ |
| ३८ | उपमानम् , शब्दः | २ |
| ३९ | वाक्यार्थः हेतुः , त्रिविधसंस्कारः | २ |
| ४० | समवायः , अभावः | २ |

**परीक्षार्थं ग्रन्थः –**

१. तर्कसंग्रहः, श्रीमदन्नम्भट्टविरचितः सुधांशु कुमार षडङ्गी (व्याख्याकार). चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०११.

**सन्दर्भग्रन्थाः-**


१. तर्कसंग्रहः. श्रीमदन्नम्भट्टविरचितः. गोविन्दाचार्यः (सम्पादकः). चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१३.

२. तर्कसंग्रहः. अन्नम्भट्टविरचितः. बालशास्त्री (सम्पादक). न्यायबोधिनी-पदकृत्य-बालमनोरमा-टीका एवं सरलाख्य-भाषाटीका सहित. चौखम्बा संस्कृत प्रतिष्ठान, नई-दिल्ली.

३. Tarksangraha. Annambhatta. S. KuppuswamiShastri. Chaukhamba Sanskrit Pratishthan.

४. दर्शनशास्त्रस्येतिहासः. ज्वालाप्रसाद गौड (सम्पादक), संस्कृत- शशिबाला गौड़. चौखम्बा सुरभारती प्रकाशन.

५. तर्कसंग्रहः. अन्नम्भट्टविरचितः. बालशास्त्री (सम्पादक). न्यायबोधिनी-पदकृत्य-बालमनोरमा-टीका एवं सरलाख्य-भाषाटीका सहित. चौखम्बा संस्कृत प्रतिष्ठान, नई-दिल्ली.

६. Tarksangraha. Annambhatta. S. Kuppuswami Shastri. Chaukhamba Sanskrit Pratishthan.

७. दर्शनशास्त्रस्येतिहासः. ज्वालाप्रसाद गौड (सम्पादक), संस्कृत- शशिबाला गौड़. चौखम्बा सुरभारती प्रकाशन

**SKT209**

# व्यावहारिकं संस्कृतम्

# (Communicative Sanskrit)

**पाठ्यक्रम कूट – SKT209**

**पाठ्यक्रमस्य शीर्षकम्- व्यावहारिकं संस्कृतम् (Communicative Sanskrit)** **क्रेडिट- 2**

**श्रेयाङ्काः** - 02 [एकम् क्रेडिट व्याख्यानम् – संघटितकक्ष्यागतिविधेः वैयक्तिकसम्पर्कस्य च १० होरासमानम्, प्रयोगशालायाः/व्यावहारिककार्यस्य/अनुशिक्षणस्य/शिक्षकनियन्त्रितगतिविधीनां ५ होरासमानम्, अन्यकार्याणि यथा स्वतन्त्रयव्यक्तिगरकार्याणि, सामूहिककार्याणि, निर्धारितानि अनिवार्य/वैकल्पिककार्याणि, साहित्यसमीक्षा, पुस्तकालयकार्याणि, तथ्यसंग्रहाः, शोधपत्रलेखनम्, संगोष्ठीपत्रलेखनादिम् १५ होरासमानं भवति ]

पाठ्यक्रमस्य उद्देश्यानि-

पाठ्यक्रमस्य उद्देश्यं वर्तते छात्रेषु संस्कृतस्य व्यावहारिकज्ञानाभिवृद्धिसम्पादनम्, तथा छात्राणां संस्कृतभाषया शुद्धरूपेण सम्भाषणस्य लेखनस्य च योग्यतासम्पादनम् संस्कृतशब्दभण्डाराभिवृद्धिसम्पादनम्, अनुवादक्षमताभिवर्धनम्।

**उपस्थिते अनिवार्यता** - पाठ्यविषयस्य पूर्णतया अवबोधाय तस्य च लाभानां सुनिश्चयाय छात्राणाम् कक्ष्यासु उपवेशनम् अत्यन्तमनिवार्यमस्ति । कक्ष्यासु न्यूनतम ७५% उपस्थितिः न भवति चेत् छात्राणां परीक्ष्यासु उपवेशस्य अवसरः निरस्तीकर्तुं शक्यते।

**मूल्याङ्कनस्य मापदण्डः – पूर्णाङ्काः --** **100**

माध्यमिकी परीक्षा – 20%

सत्रान्तपरीक्षा – 60%

सततम् आन्तरिकमूल्याङ्कनम् –20%

## पाठ्यक्रमः - SKT209 व्यावहारिकं संस्कृतम्

## (Communicative Sanskrit)

**विषयान्तर्वस्तु -**

1. संस्कृतवर्णमाला
2. शब्द उच्चारणपद्धतिः
3. व्यावहारिकशब्दाः (बन्धुवाचकाः, दैनिक-अभिवादनशब्दाः, वृत्तिसम्बद्धाः, शरीरावयवाः, लेखनसामग्री)
4. संख्यावाचकशब्दाः ( एकतः पञ्चाशत् पर्यन्तम्)
5. कारकचिह्नानि विभक्तयश्च
6. अकारान्त पुल्लिङ्ग-नपुंसकलिङ्गशब्दाः
7. आकारान्त स्त्रीलिङ्गशब्दाः
8, अधोनिर्दिष्टानि धातुरूपाणि पञ्चलकारेषु

(पठ्, गम्, लिख्, खाद्, चल् पत्)

9. व्यावहारिकसम्भाषणम्

सन्दर्भग्रन्थाः -

१. भाषाप्रवेशः भाग १, संस्कृतभारती, नई दिल्ली ।
२. संस्कृतव्यवहारसाहस्री, संस्कृतभारती, नई दिल्ली ।
३. हिन्दी-संस्कृतशब्दकोशः, संस्कृतभारती, नई दिल्ली ।
४. कारकम्, जि.महाबलेश्वर भट्टः, संस्कृतभारती, बेङ्गलूरु ।
५. रूपचन्द्रिका, ब्रह्मानन्दत्रिपाठी, चौखम्बा सुरभारतीप्रकाशन, वाराणसी, २०१४ ।
६. अनुवादचन्द्रिका, डा. ब्रह्मानन्दत्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी ।
७. शुद्धिकौमुदी, जनार्दन हेगडे, संस्कृतभारती, बेङ्गलूरु ।

## व्याख्यानयोजना

| व्याख्यानसंख्या | व्याख्यानविषयः | निर्धारितपुस्तकानि |
|---|---|---|
| 1-5 | संस्कृतवर्णमाला, शब्द उच्चारणपद्धतिः , व्यावहारिकशब्दाः (बन्धुवाचकाः, दैनिक-अभिवादनशब्दाः, वृत्तिसम्बद्धाः, शरीरावयवाः, लेखनसामग्री), संख्यावाचकशब्दाः (एकतः पञ्चाशत् पर्यन्तम्) | 1, 2, 3, 6 |
| 6,7,8 | कारकचिह्नानि विभक्तयश्च | 1, 4, 6 |
| 9,10,11 | अकारान्त पुल्लिङ्ग-नपुंसकलिङ्गशब्दाः, आकारान्त स्त्रीलिङ्गशब्दाः | 1,5,6 |
| 12,13,14,15 | अधोनिर्दिष्टानि धातुरूपाणि पञ्चलकारेषु (पठ्, गम्, लिख्, खाद्, चल् पत्) | 1,5,6 |
| 16,17,18,19,20 | व्यावहारिकसम्भाषणम् | 1,2, 6,7 |

# शुद्धोच्चारणम्
# (Correct Pronunciation)

**पाठ्यक्रम कूट – SKT476**
**पाठ्यक्रमस्य शीर्षकम्- शुद्धोच्चारणम् (Correct Pronunciation)** **श्रेयाङ्काः - 2**
**पाठ्यक्रमस्य उद्देश्यानि -**

पाठ्यक्रमस्य उद्देश्यं वर्तते छात्रेषु शुद्धोच्चारणस्य अभ्यासः संस्कारः च अत्यन्तं वर्धनीयः। ग्रन्थं, पद्यं, वाक्यं च दृष्ट्वा निर्दुष्टं च पठेयुः । वाक्यस्य उच्चारणं सर्वथा शुद्धं स्यात् । ह्रस्वदीर्घाणाम् उच्चारणम् अत्यन्तं शुद्धं भवेत् । अल्पप्राणमहाप्राणवर्णानाम् उच्चारणं च सुष्ठु भवेत्। निर्दुष्टम् उच्चारणम् उत्तमवाचकस्य उत्तमस्य छात्रस्य उत्तमस्य अध्यापकस्य च लक्षणम्। निर्दुष्टम् उच्चारणं छात्राणां विधातुं अयं पाठ्यक्रमः प्रयोगशालारूपः पाठ्यक्रमे नियोजितः।

**पाठ्यक्रमस्य प्रतिफलम् –**

